National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 253-258
© 2026 NJHSR
www.sanskritarticle.com

**Mallika Sen**
Phd Scholar of Central Sanskrit University, Muragachha, Nadia-741154 W.B.

**Correspondence:**
**Mallika Sen**
Phd Scholar of Central Sanskrit University, Muragachha, Nadia-741154 W.B.

# पुरातन-नूतन-वेदभाष्यकाराणां समालोचनायाः एकम् अध्यायनम्

**Mallika Sen**

**DOI:** https://doi.org/10.5281/zenodo.19649303

**शोधसारांशः**
वेदः भारतीयसाहित्यस्य प्राचीनतमः ग्रन्थो अस्ति । वैदिकमन्त्राणां प्रतीकात्मकार्थाः सन्ति, येन तेषां सहजतया अवगमनं दुष्करं भवति। सायणाचार्यः (यस्य भाष्यं सर्वाधिकं स्वीकृता), स्कन्दस्वामी, महिधरः, उबटश्च प्रसिद्धाः सन्ति। आधुनिककाले महर्षिदयानन्दसरस्वतीना ऋग्वेदयजुर्वेदयोः (ऋग्वेदादिभाष्यभूमिका) भाष्यं लिखिता, श्रीअनिर्वाणेन च वेदानां रहस्यानि व्याख्यातानि।

**ऋग्वेदभाष्यकाराः**

**स्कन्दस्वामी** - ऋग्वेदे स्कन्दस्वामी सुविस्तृतं विलक्षणं भाष्यं कृतवान् । स्कन्दस्वामिनः भाष्यम् ऋग्वेदस्य चतुर्थाष्टकपर्यन्तम् एव समुपलब्धं भवति ।

**नारायणः** - श्लोकक्रमाद् शब्देन च अनुमीयते यद् ऋग्वेदस्य मध्यभागे नारायणः स्वभाष्यं लिखितवान् ।

**उद्गीथः** - प्रत्येकाध्यायस्य परिसमाप्तौ तेन स्वविषये लिखितम् 'वनवासीविनिर्गताचार्यस्य उद्गीथस्य कृता ऋग्भाष्ये...... अध्यायः समाप्तः' प्राचीनकाले आधुनिककर्णाटकस्य पश्चिमभूखण्डः 'वनवासीप्रान्तः' इति नाम्ना ख्यातः आसीत् ।

**माधवभट्टः** - अस्य ऋग्वेदप्रथमाष्टकस्य टीका सम्प्रत्येव मद्रासविश्वविद्यालयतः प्रकाशिता। तेन ऋग्वेदेन सम्बद्धानि अनुक्रमणिकाः, शब्दकोशाः, एतेषु द्वे अनुक्रमणिकाः प्रकाशिताः सन्ति- (१) नामानुक्रमणी, (२) आख्यातानुक्रमणी ।

**वेंकट-माधवः** – वेङ्कटमाधवः ऋग्वेदसंहिताविषये स्पष्टतया सरलतया च भाषायां, लघुसंस्कृतौ भाष्यं लिखितवान् । तस्य ग्रन्थः भाष्यकारेषु १३०० ई. भाष्यं १०५० तः ११५० ई.पर्यन्तं लिखिता इति सम्भवति ।

**आनन्दतीर्थः** - तेन ऋग्वेदस्य प्रथममण्डलस्यस्य प्रथमचत्वारिंशत् सूत्राणां छन्दोबद्धभाष्यं रचितम् अस्ति ।

**सायणाचार्यः** - वैदिकभाष्यकारेषु आचार्यसायणस्य सर्वोच्चस्थानं वर्तते । चतुर्णां वेदानां विषये सः प्रथमः भाष्यं कृतवान् । तस्य ऋग्वेदभाष्यस्य नाम 'वेदार्थप्रकाश' इति ।

**सामवेदभाष्यकाराः**

**माधवः** - माधवः सामसंहितायाः प्रथमभाष्यकारो भवति । अस्य भाष्यस्य नाम 'विवरणम्' अस्ति ।

**गुणविष्णुः** - अस्य छान्दोग्यमन्त्रभाष्यस्य एकं सुष्ठु संस्करणम् आसीत् ।

**शुक्लयजुर्वेदभाष्यकाराः –**

**उव्वटः** - अस्य अन्यासु कृतिषु (क) ऋक्प्रातिशाख्यस्य टीका, (ख) यजुः प्रातिशाख्यस्य टीका, (ग) ऋक्सर्वानुक्रमणीभाष्यम्, (घ) ईशावास्योपनिषद्-भाष्यं च इति चत्वारः ग्रन्थाः नितान्तप्रौढाः, प्रसिद्धाः प्रकाशिताः चेति।

**महीधरः** - वाजसनेयसंहिताप्रसिद्धभाष्यस्य वेद्दीपस्य भाष्यस्य कृते प्रसिद्धः अस्ति ।

**हलायुधः** - शुक्लयजुर्वेदस्य काण्वसंहितायां "ब्राह्मसर्वस्वः" इति भाष्यं लिखितवान् ।

कृष्णयजुर्वेदभाष्यकाराः –

**भट्टभास्करमिश्रः** – तैत्तिरीयसंहितायां उपलब्धानां भाष्यानां मध्ये आचार्यमिश्रस्य भाष्यस्य नाम "ज्ञानयज्ञः" इति ।

**अथर्ववेदस्य भाष्यकाराः –** गोविन्दस्वामी, षड्गुरुशिष्यः प्रमुखाः ।

**नूतन-वेदभाष्यकाराः -** आधुनिककाले वेदानां व्याख्यां कृतवन्तः विद्वांसः 'नुतान्-वेदभाष्यकाराः' इति उच्यन्ते, ये वैज्ञानिक-ऐतिहासिक-आध्यात्मिकदृष्ट्या वेदानां पुनर्व्याख्यां कृतवन्तः । स्वामी दयानन्दसरस्वती, श्रीऔरबिन्दो, मैक्समुलरः, सायण(पारम्परिकः) प्रमुखभाष्याणि च सन्ति, येन वेदस्य अर्थस्य अवगमनाय नूतनः आधारः प्रदत्तः ।

**स्वामीदयानन्दसरस्वती–** महर्षि दयानन्दसरस्वती आधुनिक-भारतस्य विचारकः, वेदपुनरुत्थानकर्ता आर्यसमाजस्य संस्थापकः च मन्यते ।

**श्रीअरविन्दः –** तेन वेदोपनिषद्भाष्याणि लिखितानि ।

**श्री अनिर्वाणः -** तस्य सर्वोत्तमः कृतिः "वेदमीमांसा" त्रिखण्डीयग्रन्थेन प्रसिद्धः अस्ति ।

एतैः भाष्यकारैः वेदेषु कर्मकाण्डेषु स्थाने ज्ञानं, विज्ञानं, योगं च प्राधान्यं दत्तम् अस्ति ।

**प्रतीच्यव्याख्याकाराः –**

**मैक्समूलरः -** पुस्तकद्वयं बहुप्रशंसितम् आसीत्- (१) प्राचीनसंस्कृतस्य इतिहासः, (२) भारतात् अस्माभिः किं शिक्षितव्यम् इति ।

**हिल्ब्रान्टः -** सः शंख्यायनश्रौतसूत्रस्य च चतुर्धा सम्पादनं कृतवान् ।

**ग्रिफिथः –** सायणस्य भाष्यस्य सम्यक् अध्ययनं कृत्वा सः ऋग्वेदस्य आङ्ग्लभाषायां अनुवादं कृतवान् ।

वैदिकसाहित्यस्य अनुवादे, अनुसन्धाने च प्रो. गेल्डनरः, हिल्ब्रान्टः , ग्रासमैन(Grassmann)-लुडविग(Ludwig)-वेबर(Weber)-कीथ(Keith) इत्यादयः अपि महत्त्वपूर्णां भूमिकां निर्वहन्ति स्म ।

वेदः भारतीयसाहित्यस्य प्राचीनतमः ग्रन्थो अस्ति । वैदिकमन्त्राणां प्रतीकात्मकार्थाः सन्ति, येन तेषां सहजतया अवगमनं दुष्करं भवति। महर्षि यास्कः प्रथमः निरुक्ते वैदिकशब्दानां व्याख्यां कृत्वा अर्थस्य जटिलतां दूरीकृतवान्। वैदिकभाष्यकाराः विद्वांसः ऋषयः वा वेदमन्त्रसंहिताव्याख्याताः। वेदानां सिद्धान्तानां रहस्यानां च स्पष्टीकरणाय विविधाः भाष्याणि निर्मिताः सन्ति । तदनन्तरं तान् आधाररूपेण गृहीत्वा वेदपारगाः विद्वांसः वेदभाष्यलेखनं आरब्धवन्तः। प्राचीनमध्ययुगीनभाष्यकारेषु सायणाचार्यः (यस्य भाष्यं सर्वाधिकं स्वीकृता), स्कन्दस्वामी, महिधरः, उबटश्च प्रसिद्धाः सन्ति । आधुनिककाले महर्षिदयानन्दसरस्वतीना ऋग्वेदयजुर्वेदयोः (ऋग्वेदादिभाष्यभूमिका) भाष्यं लिखिता, श्रीअनिर्वाणेन च वेदानां रहस्यानि व्याख्यातानि। सायणाचार्यस्य भाष्यं पारम्परिकं(याज्ञिकं) शैल्याः अस्ति, दयानन्दसरस्वती तु आर्यसमाजद्वारा वेदज्ञानस्य उपरि बलं दत्त्वा स्वस्य भाष्यस्य प्रसारणं कृतवान् ।

तत्र आदिमे भागे ऋग्वेदस्य भाष्यकाराणां विषये, तथा मध्ये यजुर्वेदस्य, सामवेदस्य अन्ते च अथर्ववेदीयानां भाष्यकाराणां विषये आलोचना विहिता। सम्भवतः अस्मिन् एव काले वैदिकभाष्यकारानाम् प्राचीनतमः स्कन्दस्वामी प्रादुर्भूतः ।

**ऋग्वेदभाष्यकाराः**

वेदभाष्यकृत्सु स्कन्दस्वामि -नारायण-उद्गीथ-माधवभट्ट-वेङ्कट-माधव- धानुष्कयज्व-आनन्दतीर्थ-आत्मानन्द-सायण-प्रभृतयः भाष्य-काराः सुप्रसिद्धाः सन्ति सर्वत्र ।

**स्कन्दस्वामी –**

स्कन्दस्वामी ऋग्वेदस्य विषये अतीव विस्तृतं भाष्यं लिखितवान्। तस्य व्याख्यायाः विषये अपि सः टीकां कृतवान् । अस्य महापुरुषेण रचिता ऋग्वेदसंहितायां प्रथमं भाष्यम् अधुना उपलभ्यते। स्कन्दस्वामी गुजरातप्रदेशस्य प्रसिद्धस्य वलभीनगरस्य निवासी आसीत् । अस्य अपरं नाम स्कन्दमहेश्वरः इति । तस्य पितुः नाम भर्तृध्रुव आसीत् । ऋग्वेदभाष्यस्य प्रथमाष्टकस्य अन्ते भाष्यकारः स्वयमेव अस्य विषयस्य चर्चां करोति-

**बलभीविनिवासस्येतामृगर्थागमसंहृतिम् ।**
**भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथा स्मृतिः ।।**

शतपथब्राह्मणस्य विख्यातो भाष्यकारः हरिस्वामिनः गुरुः आसीत्। अतः अस्य समयः सप्तमशतकमिति निश्चितरूपेण निर्धारयितुं शक्यते। तस्मात् पूर्वं स्कन्दस्वामी ऋग्वेदस्य भाष्यं लिखितवान् आसीत्, हरिस्वामीं वेदान् अपि उपदिशति स्म । अतः स्कन्दस्वामिनः कालः ६८२ विक्रमाब्दः तथा ६२५ खीष्टाब्दः च इति अनुमानितम् ।

ऋग्वेदे स्कन्दस्वामी सुविस्तृतं विलक्षणं भाष्यं कृतवान् । अस्मिन् भाष्ये प्रत्येकं सूक्ताणाम् आरम्भे तस्य सूक्तस्य ऋषेः देवस्य च उल्लेखः वर्त्तते। तद्बोधकाः प्राचीनानाम् अनुक्रमणिग्रन्थानां श्लोकाः अपि उद्धृताः वर्तन्ते । निघण्टुनिरुक्तप्रभृतिभ्यः वैदिकार्थस्य उपबोधकेभ्यः ग्रन्थेभ्यः उपयुक्तं प्रमाणम् अपि तत्रैव सङ्कलितम् अस्ति। भाष्यमिदम् अतीव सरलम् अल्पाक्षरं च अस्ति। अत्र संक्षेपेण एव व्याकरणविषयकतथ्यानाम् उल्लेखः अस्ति-। सायणभाष्यस्य प्रथमाष्टक इव व्याकरणस्य अतिविस्तरेण प्रदर्शनम् अत्र नास्ति। सायणकृतस्य ऋग्भाष्यस्य उपरि स्कन्दस्वामिनः भाष्यस्य स्पष्टतः प्रभावः परिलक्षितः भवति । अस्य अनेकानि उदाहरणानि सन्ति। स्कन्दस्वामिनः भाष्यम् ऋग्वेदस्य चतुर्थाष्टकपर्यन्तम् एव समुपलब्धं भवति । शेषार्धस्य सम्पूर्तिः अन्येन आचार्यद्वयेन कृता अस्ति । यस्य वर्णनम् अग्रे भविष्यति। अनन्तशयनग्रन्थावल्याम् अस्य भाष्यस्य अधुना प्रकाशनं क्रमशः समारब्धम् अभवत् ।

**नारायणः –**

नारायणः उद्गीथः च स्कन्दस्वामिनः समये एव आस्ताम् । तथा वेङ्कटमाधवः ऋग्वेदभाष्ये लिखति –

**स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् ।**
**चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम् ।।**

श्लोकक्रमाद् शब्देन च अनुमीयते यद् ऋग्वेदस्य मध्यभागे नारायणः स्वभाष्यं लिखितवान् । केचन विद्वांसः सामभाष्यकर्तुः माधवस्य पितरं नारायणं तथा ऋग्वेदभाष्यकर्त्तारं नारायणमेकमेव कल्पयन्ति। अस्याऽपि समयः विक्रमस्य सप्तमशताब्द्याम् एव प्रामाणितो भवति।

**उद्गीथः --**

वेङ्कटमाधवस्य कथानुसारेण ज्ञायते यद् उद्गीथः स्कन्दस्वामिनं प्रति ऋम्भाष्यस्य लेखने साहाय्यं कृतवान् । अयं हि महापुरुषः ऋग्वेदस्य अन्तिमभागस्य भाष्यम् प्रणीतवान् । प्रत्येकाध्यायस्य परिसमाप्तौ तेन स्वविषये लिखितम् 'वनवासीविनिर्गताचार्यस्य उद्गीथस्य कृता ऋन्भाष्ये...... अध्यायः समाप्तः' प्राचीनकाले आधुनिककर्णाटकस्य पश्चिमभूखण्डः 'वनवासीप्रान्तः' इति नाम्ना ख्यातः आसीत् ।

सायणः आत्मानन्दः च उद्गीथस्य नामोल्लेख स्वभाष्ये अकुरुताम् । पञ्चत्रिंशदधिकोनविंशतितमे
खीष्टाब्दे लाहौरनगरस्य डी.ए.वी. महाविद्यालयस्य शोधविभागः अस्य भाष्यस्य प्रारम्भिकार्द्धभागं प्रकाशितवान् ।

**माधवभट्टः –**

इतिहासकाराः माधव-नामधेयानां चतुर्णां भाष्यकाराणां नामोल्लेख कुर्वन्ति । तेषु एकः सामवेदसंहितायां किञ्च अन्ये त्रयः ऋग्वेदे भाष्यं लिखितवन्तः। तत्र माधवः स्वयं पदानाम् अर्थमात्रोऽन्वयस्योपरि कथयति – **'वर्जयन् शब्दविस्तारं शब्दै कतिथयैरिति।'**

सायणः अथवा वेङ्कट एव 'माधवः' इत्यनेन नाम्ना ख्यातः आसीत् । अस्य ऋग्वेदप्रथमाष्टकस्य टीका सम्प्रत्येव मद्रासविश्वविद्यालयतः प्रकाशिता । तेन ऋग्वेदेन सम्बद्धानि अनुक्रमणिकाः, शब्दकोशाः, एतेषु द्वे अनुक्रमणिकाः प्रकाशिताः सन्ति- (१) नामानुक्रमणी, (२) आख्यातानुक्रमणी । एते अनुक्रमणिकाः अधिकतया दुर्लभाः सन्ति । माधवभट्टोऽयं ऋग्वेदस्य महान् विद्वान् आसीत् इत्यत्र नास्ति कोऽपि सन्देहावसरः। अस्याः टीकायाः लेखनात् पूर्वमेव स एकादशानुक्रमणीः अलिखत् । यासु प्रत्येका अनुक्रमणी कोषवत् स्थित्वा ऋग्वेदस्य शब्दान् अर्थान् च प्रकटयितुं समर्थाऽस्ति । अस्य वैशिष्ट्यस्य सङ्केतः वेदमर्मज्ञाः विद्वांसः प्रथममेव देवराजयज्वानः निघण्टुनिर्वचनाद् प्राप्तवन्तः। अपि च कतिपयाः निर्देशाः सायणमाधवस्य बृहद्भाष्ये एव मिलन्ति।

**वेंकटमाधवः –**

वेङ्कटमाधवः ऋग्वेदसंहिताविषये स्पष्टतया सरलतया च भाषायां, लघुसंस्कृतौ भाष्यं लिखितवान् । तस्य ग्रन्थः भाष्यकारेषु १३०० ई. भाष्यं १०५० तः ११५० ई.पर्यन्तं लिखिता इति सम्भवति । प्रथमाध्याये च स्वकीयं वनवृत्तं लिखितवान्। सः शास्त्राणां महान् विद्वान् आसीत् । तस्य पितुः पितामहः माधवः आसीत्; तस्य पिता वेङ्कटाचार्यः आसीत्; तस्य मातृपितामहः भवगोल आसीत्; तस्य माता च सुन्दरी आसीत् । केवलं ब्राह्मणग्रन्थाः एव वेदानां पूर्णतया टिप्पण्यां सहायकाः इति तस्य स्वकीयः प्रत्ययः। अन्यः निघन्तुभाष्यकारः देवराजयज्वा निघन्तुभाष्ये स्वसमयस्य (१३७० ई.) उल्लेखं कृतवान् अस्ति। 'नानार्थाविसंक्षे' इति च ग्रन्थे माधवाचार्यसूरिनाम्ना माधवः एव उल्लिखितः। वेङ्कटमाधवस्य टीका डॉ. लक्ष्मणदासद्वारा ४ भागेषु प्रकाशिता अस्ति। या वेङ्कात्माधवस्य भाष्यस्य सारगर्भितोऽस्ति ।

**आनन्दतीर्थः –**

आनन्दतीर्थः 'मध्य' इति नाम्ना विश्वमञ्चे सुप्रसिद्धः अस्ति । द्वैतवादी वैष्णव सम्प्रदायस्य पिता मन्यते । तेन ऋग्वेदस्य प्रथममण्डलस्यस्य प्रथमचत्वारिंशत् सूत्राणां छन्दोबद्धभाष्यं रचितम् अस्ति । तेन वेदानां (नारायणस्य) वर्णनं **"वेदैश्च सर्वैरहमेव वेद्यः "** इति गीतातः अस्य श्लोकस्य अनुसारं भगवतः नारायणस्य स्तुतिः वेदे वर्तते, अस्मात् भाष्यात् एतत् स्पष्टं भवति । स्वयं भाष्यारम्भे कथयति- "नारायणः पूर्ण" इति । सम्पूर्णे पुरुषसूक्ते नारायणः पुरुषः इति निर्दिश्यते । एकस्मिन् पूर्णपुरुषे सर्वे वेदाः शास्त्राणि च व्याख्याताः ।

**स पूर्णत्वात् पुमान् नाम पौरुषे सूक्त ईरितः ।**
**स एवाखिलवेदार्थः सर्वशास्त्रार्थ एव च ।।**

आनन्दतीर्थस्य कालः १२५५ तः १३३५ ई. संवत १३ शताब्दी ई. ऋग्वेदस्य केचन विशिष्टाः स्तोत्राः स्वीकृताः, भाष्याणि च कृताः । सः एव माधववैष्णवसम्प्रदायस्य परम्परायाः विस्तारं कृतवान् ।

**सायणाचार्यः –**

वैदिकभाष्यकारेषु आचार्यसायणस्य सर्वोच्चस्थानं वर्तते । सः अनेकानि ग्रन्थानि रचितवान्, परन्तु तस्य प्रसिद्धेः मेरुदण्डः तस्य भाष्याणि एव । चतुर्णां वेदानां विषये सः प्रथमः भाष्यं कृतवान् । तस्य पुरतः चतुर्णां वेदानां विषये भाष्यं न लिखितम् आसीत् । आचार्यसायणस्य जीवनं त्रयोदश (१३) शताब्द्याः अस्ति । आचार्य सायणः भरद्वाजगोत्रस्य दक्षिणभारतीयः ब्राह्मणः आसीत् । तस्य पितुः नाम मायणः, मातुः नाम श्रीमती च आसीत् ।

आचार्यसायणः विजयनगरसंस्थापकस्य महाराजबुक्कस्य महाराज-हरिहरस्य च अमात्यः सेनानीः चे आसीत्। सायणो वैदिकसम्प्रदायस्य यथार्थः ज्ञाता आसीत्। तस्मात् तदीयं वेदभाष्यं वेदार्थस्य सर्वेषु भाष्येषु श्रेष्ठं भाष्यम् अस्ति । सः सायणाचार्यः दुर्गमे तस्मिन् वेददुर्गे सरलतया एव वेदार्थस्य जिज्ञासुं प्रवेशयति ।

महाराजस्य बुक्कस्य प्रधानम् मन्त्रिपदम् सायणाचार्यः १३६४ ख्रीष्टाब्दतः १३७८ ख्रीष्टाब्दपर्यन्तम् अलंकृतवान्। तदनन्तरं सः १३७९ खीष्टाब्दतः १३८७ ख्रीष्टाब्दम् इति मृत्युपर्यन्तं महाराजस्य हरिहरस्य मन्त्रिपदम् अलङ्कृतवान् । अतः ख्रीष्टस्य चतुर्दशशताब्देः उत्तरार्द्धः एव सायणस्य भाष्यस्य रचनाकालः आसीत् इति कल्पयितुं शक्यते। सायणाचार्यस्य ज्येष्ठभ्राता आसीत् माधवाचार्यः। अनुजस्य च नाम भोगनाथः आसीत् । तस्य कृते गुरुः ईश्वरस्य परमात्मस्वरूपः आसीत् । प्रत्येकं भाष्यस्य अन्ते तेन लिखितम् – **यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।** सायणाचार्यस्य ऋग्वेदभाष्यस्य नाम 'वेदार्थप्रकाश' इति । तेन एतां भाष्यं स्वगुरु विद्यातीर्थाय समर्पिता-

**वेदार्थस्य प्रकाशेन तमो हार्द निवारयन्।**
**पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ।।१**

**सामवेदभाष्यकाराः-**

**माधवः –**

माधवः सामसंहितायाः प्रथमभाष्यकारो भवति । माधवस्य पितुः नाम नारायणः आसीत्। सः सामवेदस्य उभयोः खण्डयोः छन्दार्चिकोत्तरार्चिकयोः उपरि भाष्यं निर्मितवान्। अस्य भाष्यस्य नाम 'विवरणम्' अस्ति। छन्दार्चिकभाष्यस्य नाम 'छन्दसिका-विवरणम्' तथा उत्तरार्चिकभाष्यस्य नाम 'उत्तरविवरणम्' अस्ति। अद्यावधि इदं भाष्यम् अमुद्रितावस्थायाम् एवास्ति। सत्यव्रत-सामश्र-यीमहोदयः इदं भाष्यम् अन्विष्टवान्। सः सर्वप्रथमं स्वकीय-सायणभाष्यसंस्करणे अस्य अपि भाष्यस्य किमपि अंशं टिप्पणीरूपेण -सन्निविष्टवान्

द्वादशशतकस्य देवराजयज्वा स्वीयनिघण्टुभाष्यस्य भूमिकायां कस्यापि माधवस्य निर्देशं कृतवान्। सम्भवतः अयं माधव एवं सामभाष्य-रचयिता अस्ति। न तावद् एतावता अपि तु बाणभट्टस्य कादम्बर्याः श्लोकः अयम् अस्ति –

**१. ऋपुष्पिका/१/१ .वे .**

**रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमः स्पृशे।**
**अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः ॥**

माधवस्य भाष्यमिदम् अतीवमहत्त्वपूर्णम् अस्ति ।

**गुणविष्णुः -**

गुणविष्णुः साममन्त्रस्य व्याख्यां विरचितवान्। तस्य व्याख्यानस्य मिथिलायां बङ्गप्रदेशे चातिप्रसिद्धिः अस्ति। अस्य छान्दोग्यमन्त्र-भाष्यस्य एकं सुष्ठु संस्करणम् आसीत्। तत् भाष्यं 'कलकत्ता-

परिषद्-संस्कृत-' इति नाम्नः संस्थातः प्रकाशितं जातम्। अस्य ग्रन्थस्य प्रस्तावनायां विद्वान् सम्पादकः गुणविष्णोः विषयेऽनेकानां ज्ञातव्यविषयाणां विवेचनं कृतवान् ।

छान्दोग्यमन्त्रभाष्यम् इदं सामवेदस्य कौथुमशाखायाः उपरि अस्ति । 'हलायुधेन काण्वे कौथुमे गुणविष्णुना' सायणकृतमन्त्रभाष्यस्याधारः गुणविष्णोः भाष्यमेवाऽस्ति' इति वदन्ति आलोचकाः।

तस्य प्रसिद्धपुत्रस्य लक्ष्मणसेनस्य राज्यकाले विद्यमानः आसीत्। अतोऽस्य गुणविष्णोः समयः विक्रमस्य द्वादशशतकस्य अन्तिमभागः त्रयोदशशतकस्यादिमभागश्च निश्चीयते ।

गुणविष्णोः 'छान्दोग्यमन्त्रभाष्यम्' नितान्तं विख्यातः ग्रन्थोऽस्ति। अस्य द्वावन्यावपि ग्रन्थौ स्तःमन्त्रब्राह्मणभाष्यम्-पारस्करगृह्यसूत्र-भाष्यञ्चेति।

**शुक्लयजुर्वेदभाष्यकाराः –**

**उव्वटः –**

माध्यन्दिन्यसंहितायां भाष्येषु उवटस्य भाष्यम् अत्यन्तं प्रसिद्धा अस्ति। तस्य नाम उव्वट् उवट् च इति लिखितम् अस्ति। सः आनन्दपुरनिवासिनः वज्रटस्य पुत्रः आसीत् । सः एकादशशताब्द्याः अन्ते महाराजभोजस्य शासनकाले अवन्तीनगरे निवसन् "उवट" इति भाष्यस्य रचनां कृतवान्, या अद्यत्वे अपि उपलभ्यते। यजुर्वेदभाष्यस्य अन्ते तेन स्वस्य परिचयः कृतः-

**आनन्दपुरवास्त व्यवज्रटारव्यस्य सूनुना ।**
**उव्वटेन कृतं भाष्यं पदवाक्यैः सुनिश्चितैः ।।**
**ऋष्यादीवच पुरस्कृत्य अवन्त्यामुत्वटोवसन्।**
**मन्त्राणां कृतवान भाष्यं महीं भोजे प्रशासित ।।**

अयं श्लोकः देशसम्बद्धं विसंगर्ति प्रकाशयति । अवन्त्यां (उज्जयिनी) निवसन् भाष्यं रचितवान् । गुजरातस्य प्रसिद्धे आनन्दपुरे निवसन् भाष्यं लिखितवान् इति संदिग्धः इव दृश्यते ।

महाराजः भोजः धारानगरशासकः परमारवंश्यः च आसीत्। स हि १०१८ ईशवीये सिंहासनारूढः भूत्वा १०६३ ईशवीयपर्यन्तं राज्यं कृतवान् इति तस्य कालः एकादशशतकम् । भोजस्य कविजनप्रियत्वं प्रसिद्धम्। शेखगिरिशास्त्रिणः लिखन्ति यद् अर्थ भोजः धारातः स्वां राजधानीम् उज्जयिनीम् आनीतवान् इति 'आइने अकबरी' पुस्तके लिखितं वर्तते । तेन पूर्वम् उल्लिखितस्य भोजराजस्य समयः १०१८ ईशवीयतः १०६३ ख्रीष्टीयः वर्तते । अतः भोजराजसमयकालिकत्वेन उव्वटः ख्रीष्टीयस्य एकादशशतकस्य पूर्वार्द्ध आसीत् इति निश्चयेन वक्तुं शक्यते । अस्य भाष्यं लघ्वक्षरम् अपि सत् अतीव प्रोज्वलम्, सरलं प्रामाणिकं च अस्ति। भाष्ये अस्मिन् अनेकमन्त्राणाम् अध्यात्मपरकः अर्थः दर्शितः अस्ति। अनेन प्रतीतः भवति यद् अयं मध्ययुगस्य एकः नितान्तप्रौढः वेदज्ञः आसीत्। अस्य अन्यासु कृतिषु (क) ऋक्प्रातिशाख्यस्य टीका, (ख) यजुः प्रातिशाख्यस्य टीका, (ग) ऋक्सर्वानुक्रमणीभाष्यम्, (घ) ईशावास्योपनिषद्-भाष्यं च इति चत्वारः ग्रन्थाः नितान्तप्रौढाः, प्रसिद्धाः प्रकाशिताः चेति।

**महीधरः –**

महीधरः वाजसनेयसंहिताप्रसिद्धभाष्यस्य वेद्दीपस्य भाष्यस्य कृते प्रसिद्धः अस्ति । सः काशीनिवासी नगरब्राह्मणः च आसीत् । तस्य समयः प्रायः १२ शताब्द्याः अस्ति । सः स्वभाष्ये सर्वान् वैदिकग्रन्थान् श्रौतसूत्रान् ब्राह्मणग्रन्थान् च साहाय्येन यज्ञनिष्पादनस्य सम्पूर्णविधिं प्रददाति । सः वेददीपनामकस्य सामभाष्यस्य रचनां सम्पादितवान् । यद्यपि भाष्यमिदं न मौलिकं तथापि अर्थस्य विशदतया दृष्ट्या नितान्तं ग्राह्यम् अस्ति। अस्य सामभाष्यस्य पाण्डुलिपिः सरस्वतीभवनपुस्तकालये संगृहीता अस्ति। अस्य भाष्यस्य उपरि उव्वटभाष्यस्य स्पष्टच्छाया दृश्यते । अस्मिन् भाष्ये त्रिधा अर्थः अवगतः, सः भाष्ये अनेकस्थानेषु निरुक्तस्य प्रमाणमपि ददाति । एष भाष्यं वस्तुतः आधिदैविक, आधिभौतिक आध्यात्मिकरूपेण च उपलभ्यते। अयं महीधरः वैदिकसाहित्ये पारङ्गमः आसीत् । महीधरः 'मन्त्रमहोदधि' नाम्ना तन्त्ररहस्यविवेचकम् एकं ग्रन्थं विक्रमस्य १६४५ शतके रचितवान् (१५८८ई०) । अस्य ग्रन्थस्यान्ते भाष्यकारेण लिखितम् इदम्-

**अब्दे विक्रमतो जाते बाणवेदनृपैर्मिते ।**
**ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः ॥ इति**

अतः अस्य भाष्यकारस्य समयः षोडशशतकस्य उत्तरार्द्धः इति निश्चीयते। उव्वटाचार्यात् पञ्चाशद्वर्षानन्तरम् अयम् अभवत्। महीधराचार्यः नरसिंहस्य उपासकः आसीत् । तस्य उल्लेखः ग्रन्थेषु बहुशः उपलभ्यते ।

**हलायुधः -**

भाष्यकारेषु हलायुधस्य विशिष्टशैली अस्ति । शुक्लयजुर्वेदस्य काण्वसंहितायां "ब्राह्मसर्वस्वः" इति भाष्यं लिखितवान् । सः बङ्गालदेशात् "वात्स्य" गोत्रस्य ब्राह्मणः आसीत् । तस्य पितुः नाम धनञ्जयः आसीत् । भाष्यस्य आरम्भे सः प्रसिद्धराजस्य 'लक्ष्मणसेन' इत्यस्य दरबारस्य धर्माधिकरी इत्यस्य महत्त्वपूर्णं पदं धारयति स्म । अतः लक्ष्मणसेनस्य धार्मिकाधिकारत्वात् हलायुधकालः ई. १२०० इति स्पष्टः अस्ति ।

ब्राह्मणसर्वस्वं विहाय मीमांससर्वस्वं, वैष्णवसर्वस्वं, शैवसर्वस्वं, पण्डितसर्वस्वं इत्यादीनि ग्रन्थानि पठितवन्तः।

**बाल्ये ख्यापितराज पण्डितपदं श्वेतार्चिबिम्बोज्ज्वल**
**छोत्सिक्त महामहस्तमुपदं दत्त्वा नबे यौवने ।**
**यस्मै यौवनशेषयोग्यमखिलक्ष्मापालनारायणः**
**श्रीमान् लक्ष्मणसेन देवनृपतिर्धर्माधिकारं ददौ ।।**

**कृष्णयजुर्वेदभाष्यकाराः –**

**भट्टभास्करमिश्रः –**

तैत्तिरीयसंहितायां उपलब्धानां भाष्यानां मध्ये आचार्यमिश्रस्य भाष्यं सर्वाधिकव्यापकः अस्ति । स्थिरकालस्य आचार्याणां मतं यत् सः ११ शताब्द्याः भाष्यकारः आसीत् । आचार्यमिश्रः शैवः आसीत्, यतः तस्य शिवस्य मंगलाचरणं एतत् सूचयति इति भासते । आचार्यमिश्रस्य भाष्यस्य नाम "ज्ञानयज्ञः" इति ।

**भवस्वामी –**

सः प्राचीनः वैदिकः विद्वान् तैत्तिरीयब्राह्मणस्य भाष्यकारः च आसीत्। बौधायन-कल्पविवरण इति बोधायनश्रौतसूत्रस्य भाष्यमपि लिखितवान्।

**अथर्ववेदस्य भाष्यकाराः**

**गोविन्दस्वामी –**

त्रयोदशशतकोद्भवः 'दैव' इति पदस्य टीका 'पुरुषाकारः' इति। अस्याः टीकायाः कर्त्ता श्रीकृष्णलीलांशुकमुनि , यः १९८ कारिकायाः टीकायां गोविन्दस्वामिनः नामोल्लेख कृतवान्। अयं ग्रन्थः अनन्तशयन-ग्रन्थमालायां प्रकाशितोऽस्ति ।

**षड्गुरुशिष्यः –**

अयं विद्वान् ऐतरेयब्राह्मणस्य, ऐतरेयारण्यकस्य, आश्वलायन श्रौतसूत्रस्य, आश्वलायगृह्यसूत्रस्य च व्याख्याम् कृतवान्। वेदान्तदीपिकाख्यायाः कात्यायनस्य सर्वानुक्रमण्याः व्याख्या अस्य विदुषः अस्ति यत् तस्य सरसरचनाकौशलेन नितरां प्रसिद्धा। इयं व्याख्या आक्सफोर्ड विश्वविद्यालयद्वारा सुसम्पादिता प्रकाशिता अस्ति।

**नूतन-वेदभाष्यकाराः -**

आधुनिककाले वेदानां व्याख्यां कृतवन्तः विद्वांसः 'नुतान्-वेदभाष्यकाराः' इति उच्यन्ते, ये वैज्ञानिक-ऐतिहासिक-आध्यात्मिकदृष्ट्या वेदानां पुनर्व्याख्यां कृतवन्तः। स्वामी दयानन्दसरस्वती, श्रीऔरबिन्दो, मैक्समुलरः, सायण(पारम्परिकः) प्रमुखभाष्याणि च सन्ति, येन वेदस्य अर्थस्य अवगमनाय नूतनः आधारः प्रदत्तः ।

**स्वामी दयानन्दसरस्वती –**

महर्षि दयानन्दसरस्वती आधुनिकभारतस्य विचारकः, वेदपुनरुत्थानकर्ता आर्यसमाजस्य संस्थापकः च मन्यते।

अस्य जन्म ब्राह्मणकुले गुजरातराज्यस्य टङ्करानगरे १८२४ तमे वर्षे फेब्रुवरी-मासस्य १२ दिनाङ्के अभवत् । तस्य बाल्यकालस्य नाम मुलशङ्करः आसीत् । तस्मिन् वेदे एकेश्वरत्वं वैज्ञानिकत्वं च सिद्धं कृतवान् । तस्य भाष्यम् 'वेदार्थ-प्रक्रिया' (वेदव्याख्यानम्) आधारितम् अस्ति।

स्वामी दयानन्द सरस्वती नैरुक्तप्रक्रियायाः उपयोगेन स्वस्य वेदव्याख्यां प्रस्तुतवान् । सः शुक्लयजुर्वेदस्य संस्कृते हिन्दीभाषायां च व्याख्यां कृतवान् । सः केवलं ऋग्वेदस्य सप्तममण्डलस्य ८० स्तोत्राणां व्याख्यां कर्तुं शक्नोति स्म। परन्तु तस्य आकस्मिकनिधनात् ऋग्वेदभाष्यम् अपूर्णा एव अभवत् । तस्य कार्याणि –

| | |
|---|---|
| भ्रान्तनिवारणम् | पञ्चमहायज्ञविधिः |
| वेदांगप्रकाशः | गोकरुणानिधिः |
| सत्यार्थप्रकाशः | संस्कारविधिः |
| आर्याभिविनयः | आर्योद्देश्यरत्नामाला |

**श्रीअरविन्दः –**

औरबिन्दो इत्यस्य मते वैदिकमन्त्रेषु उच्चतरं, महत्तरं, व्यापकं, शाश्वतं, असृष्टं च सत्यं भवति । तस्य पूर्णनाम औरबिन्दो घोषः अथवा श्री औरबिन्दो इति नाम्ना प्रसिद्धः आसीत्। १८७२ तमे वर्षे कोलकातानगरे जन्म प्राप्नोत् । तेन वेदोपनिषद्भाष्याणि लिखितानि । तस्य प्रयासः मन्त्रान्तर्गतं विज्ञानस्य अन्वेषणम् आसीत्; सः योगी इति अपि उच्यते स्म । योगी औरबिन्दो अनेकमन्त्रार्थाय वैज्ञानिकं आध्यात्मिकं च रूपं दातुं प्रयतितवान् । महर्षिः औरबिन्दो वेदान् आध्यात्मिकज्ञानस्य स्रोत्र इति मन्यते । 'The Secret of the Veda' इति ग्रन्थे सः वेदान् आध्यात्मिकरूपेण मनोवैज्ञानिकरूपेण च प्रस्तुतवान्, यत् सायणस्य कर्मकाण्डीव्याख्यायाः भिन्नम् अस्ति ।

**श्रीपाददामोदरसातवलेकरः -**

विख्यातविद्वान् श्रीपादः महाराष्ट्रस्य रत्नगिरीमण्डलस्य कोलगांवनगरे १८६७ तमे वर्षे जन्म प्राप्नोत् । सः 'वैदिकराष्ट्रगीत' इति पुस्तकमपि लिखितवान् यत् राष्ट्राय उपयोगी आसीत् । वैदिकप्रार्थनायां तेजः वर्धते इति तस्य विश्वासः आसीत्, आर्यसमाजस्य अपि प्रभावः आसीत्।

पं. सत्वलेकरस्य कृतयः (१) अथर्ववेदस्य सुबोध भाष्यः (२) सामवेदस्य सुबोध भाष्यस्य पुरुषार्थ बोधिनी, भगवद्गीता, वेदसुधा, एवं प्रकारेण हिन्दी-मराठी-भाषाभ्यां बहवः ग्रन्थाः अनुवादिताः सन्ति । यत् चतुर्णां वेदानां विशेषेण उपलभ्यते । वेदमूर्तिश्रीपादः आधुनिकयुगस्य वेदव्यास अस्ति । तैत्तिरीयसंहिता, मैत्रायणीसंहिता, काठकसंहिता इत्यादयः चतुर्णां वेदानां विशुद्धरूपेण हिन्दीभाषायां अनुवादः कृतः यत् अनेकेषु खण्डेषु प्रकाशितम् अस्ति । अन्तिमे च सः १०२ वर्षाणि वयः प्राप्तवान् ।

**रामचन्द्र-नारायण-दांडेकरः –**

भारतस्य महाराष्ट्रस्य इन्डोलॉजिस्ट्, वैदिकविद्वान् च आसीत् । तस्य प्रमुखाः कृतयः - १.वैदिकसूची

२.वैदिकदेवता नवीनदर्शनम् च (मराठी) ३.हिन्दूधर्मः – इतिहा-साण्याशयः(मराठी) ४. e edge of e guptaj ५. Sanskrit Studies Out India

**श्री अनिर्वाणः -**

२० शताब्द्याः प्रसिद्धेषु मीमांसकवैदिकभाष्यकारेषु, दार्शनिकेषु, अन्यतमः विद्वान् च श्री अनिर्वाणः १८९६ तमे वर्षे वर्तमान-बाङ्गलादेशस्य मायमेन्सिङ्ग-नगरे जन्म प्राप्य तस्य पूर्वमठनाम नरेन्द्रचन्द्रधरः आसीत् । पारम्परिकशाब्दिकव्याख्यानात् परं गत्वा सः वेदानां आध्यात्मिकं गूढं च व्याख्यानं कृतवान्। तस्य सर्वोत्तमः कृतिः "वेदमीमांसा" त्रिखण्डीयग्रन्थेन प्रसिद्धः अस्ति। सः अपौरुषेय-आध्यात्मिक-अभिज्ञतायामालोके वेदानां व्याख्यां कृतवान्। तस्य ग्रन्थेषु ऋग्वेदमन्त्राणां मनोवैज्ञानिकं रूपकविश्लेषणं च प्रकाशितं भवति । श्री औरबिन्दो इत्यस्य ग्रन्थस्य "The Life Divine" इत्यस्य बङ्गलाभाषायाः अनुवादं सफलतया सम्पन्नवान् । असाधारणं ज्ञानप्रदं च लेखनं रवीन्द्रपुरस्कारेण पुरस्कृतः । सः वेदान् न केवलं यज्ञमन्त्रान्, अपितु ऋषीणां प्रत्यक्षानुभवव्यञ्जकान् अपि मन्यते स्म ।

**आचार्यकपिलदेव-शास्त्री: -** तेन अथर्ववेदस्य भाष्यं कृतवान् ।

**पंक्षेमकरणदास .-त्रिवेदीः -** सः ऋग्वेदस्य विषये भाष्यं कृतवान् ।

**अन्ये उल्लेखनीयाः आधुनिकभाष्यकाराः :**

**स्वामी-सत्यप्रकाश-सरस्वती: -** यजुर्वेदस्य आङ्ग्लभाष्यकारः।

**पंडित-जगत-राम: -** यो दयानन्द-सरस्वत्या ः दर्शनं अनुसृत्य ।

**स्वामी-विवेकानन्दः -** वेदानां वेदान्तपक्षे बलमस्ति ।

एतैः भाष्यकारैः वेदेषु कर्मकाण्डेषु स्थाने ज्ञानं, विज्ञानं, योगं च प्राधान्यं दत्तम् अस्ति ।

**प्रतीच्यव्याख्याकाराः -**

**मैक्समूलरः –**

मैक्समूलरः वैदिकसाहित्ये महत्त्वपूर्णं योगदानं दत्तवान्। सः प्राचीनसंस्कृत-इतिहासस्य विषये ग्रन्थान् रचितवान् । तस्य ग्रन्थाः विविधपाठ्यक्रमेषु अपि पाठ्यन्ते। १८२३ तमे वर्षे इङ्ग्लैण्ड्देशे जन्म प्राप्य सः तस्य देशस्य मूलनिवासी आसीत्। हितोपदेशस्य (नीति-गीता) जर्मनभाषायां अनुवादं कृतवान् । गुरुः वर्नोफ् इत्यस्य आग्रहम्

अनुसृत्य सः सायणभाष्यसहितं ऋग्वेदं अन्येभ्यः विद्वांसेभ्यः उपस्थाप्य ऋग्वेदस्य आङ्ग्लभाषायां अनुवादं कृतवान्। सः वैदिककालस्य चतुर्धा विभज्य ।

मैक्समूलरस्य पुस्तकद्वयं बहुप्रशंसितम् आसीत्- (१) प्राचीनसंस्कृतस्य इतिहासः, (२) भारतात् अस्माभिः किं शिक्षितव्यम् इति । १८५९ तमे वर्षे प्रकाशितस्य तस्य पूर्वग्रन्थे वेदानां तिथिनिर्धारणस्य प्रशंसनीयप्रयासस्य विषये केन्द्रितम् आसीत् । वेदविषये सः १८९० तमे वर्षे प्रकाशितस्य "भौतिकधर्म" इति पुस्तके स्वस्य काश्चन दोषान् सम्बोधितवान् । ऋग्वेदस्य ७५ तमे सूक्तस्य भौगोलिकं ऐतिहासिकं च सन्दर्भं च व्याख्याय एकान्तकविनां, सिन्धुनद्याः, पञ्चनाद्यस्य च वर्णनं कृत्वा भौगोलिक-ऐतिहासिक-सन्दर्भेण प्रसिद्धस्य प्रदेशस्य पंचनाद्यस्य रूपरेखां कृतवान् । विदेशीयसंस्कृतविद्वांसः मध्ये "वेदज्ञः" (वेदवादी) "पण्डित" (विद्वान्) इति उपाधिं प्रासुं मैक्समूलरस्य श्रेयः अस्ति ।

**प्रो. गेल्डनरः –** १८५२ तमे वर्षे डिसेम्बर्-मासस्य १७ दिनाङ्के सैलफेल्ड -नगरे जन्म प्राप्य प्रोफेसरः गेल्ड्नर् पाश्चात्य-विद्वान् आसीत् । अन्यैः विद्वांसैः सह सहकार्यं कृत्वा सः ऋग्वेदस्य प्रायः ७० स्तोत्राणां अनुवादं प्रकाशितवान् । तस्य ग्रन्थेषु टिप्पणीकृताः जर्मन-अनुवादाः सन्ति, वैदिक-अध्ययनेन च वैदिक-व्याख्याः पारम्परिक-अधिकारेण प्रस्तुताः सन्ति । सः सम्पूर्णं ऋग्वेदं जर्मनभाषायां अनुवादितवान् । अयं अनुवादः तस्य मृत्योः अनन्तरं हार्वर्ड-ओरिएंटल-श्रृङ्खलायां प्रकाशितः ।

**हिल्ब्रान्टः -**

जर्मनीदेशे १८५३ तमे वर्षे मार्चमासस्य १५ दिनाङ्के जन्म जर्मनविद्वान् अल्फ्रेड् हिलेन्ब्राण्ड्ट् इत्यनेन वैदिकसाहित्यक्षेत्रे विशेषतया वैदिकपौराणिककथाविषये उत्कृष्टसंशोधनद्वारा महत्त्वपूर्णं योगदानं कृतम् अस्ति । अध्ययनकाले हिलेन्ब्राण्ड्ट् इत्यनेन वेद-अवेस्ता-श्रौतसूत्र-संस्कृतनाट्य-काव्य-व्याकरण-अर्थशास्त्र-भारतीय-इतिहास-सम्बद्धेषु विविधविषयेषु २०० तः अधिकाः लेखाः, समीक्षाः, पुस्तकानि च लिखितानि । सः शंख्यायनश्रौतसूत्रस्य च चतुर्धा सम्पादनं कृतवान् । एते चत्वारः भागाः १८६५ तः १८६६ पर्यन्तं प्रकाशिताः ।१८६७ तमे वर्षे सः स्वस्य महत्त्वपूर्णं पुस्तकं Zubcr प्रकाशितवान् । तदनन्तरं १८३० तमे वर्षे अद्यत्वे यस्य कृतिः प्रसिद्धा अस्ति, सः जर्मन-विद्वान् अन्तिमं निःश्वासं गृहीतवान् ।

**ग्रिफिथः –**

वाराणसीसंस्कृतमहाविद्यालयस्य प्राध्यापकः ग्रिफिथः १८२६ तमे वर्षे मेमासस्य २५ दिनाङ्के कोर्सली-विल्ट-नगरे जन्म प्राप्नोत्। सायणस्य भाष्यस्य सम्यक् अध्ययनं कृत्वा सः ऋग्वेदस्य आङ्ग्लभाषायां अनुवादं कृतवान्। यजुर्वेदानुवादे श्लोकानां अर्थं प्रस्तुतवान्। सामवेदभाष्ये सामसंहितायां वर्णिता उद्गतेन सोमायागेषु गायनविधिं धार्मिकयाज्ञसंकलनं च वर्णयति । अथर्ववेदानुवादे स लिखति यत् यथा वेदनामानि उल्लिखितानि, तथैव अथर्ववेदस्य ऋत्विकः (ऋत्विकः) अस्ति ।

**प्रो.रुडाल्फ-रॉथः –**

जर्मनविद्वान् वेर्न्फ् इत्यस्य शिष्यः रुडाल्फ-रॉथः वैदिकभाषाशास्त्रस्य जनकः इति मन्यते, सः 'निरुक्तस्य' अध्ययने बलं दत्तवान् । सः भारतीयविद्वानानां मतैः असहमतः, वैदिकव्याख्यायाः दृष्टिकोणं तुलनात्मकभाषाविज्ञानेन सह संयोजयित्वा पौराणिक-कथानां श्रेष्ठतायाः वकालतम् अकरोत् । तेने १८४६ तमे वर्षे जर्मनीदेशे वैदिक-अध्ययनस्य विस्तारः कृतः। सः अथर्ववेदस्य पैप्पालादशाखायाः सम्पादनं कृत्वा कार्यं कृतवान् । अन्यत् संस्करणं १८५२ तमे वर्षे १८७५ तमे वर्षे च सप्तखण्डेषु प्रकाशितम् । एतत् (शौनाकाशाखा) रोथ् तथा हिवटनी (बर्लिन, १८५६) इत्यत्र उपलभ्यते स्म । तस्य महत्त्वपूर्णं पुस्तकम् आसीत् "सेन्टपीटर्सवर्ग-संस्कृत-जर्मन- महाकोश " इति ।

**होरेस-हेमन-विल्सनः –**

यूरोपीयविद्वांसः अपि १८०० ई.तः परं भाषावैज्ञानिक-सामाजिक-वैज्ञानिकदृष्ट्या वेदेषु रुचिं प्रारब्धवन्तः। तेषां सर्वेषां वेदानां ब्राह्मणग्रन्थानां च आङ्ग्ल-जर्मन-फ्रेञ्च्-भाषायां अनुवादः कृतः, येन वेदव्याख्यायाः सर्वथा नूतनाः उपायाः उत्पन्नाः ।

वैदिकसाहित्यस्य अनुवादे, अनुसन्धाने च ग्रासमैन(Grassmann)-लुडविग(Ludwig)-वेबर(Weber)-कीथ(Keith) इत्यादयः अपि महत्त्वपूर्णां भूमिकां निर्वहन्ति स्म ।

**सन्दर्भग्रन्थानांसूची**

१. उपाध्यायः, श्री बलदेव । *संस्कृत-वाङ्मय का बृहद् इतिहास (प्रथम खण्ड वेद)* । लखनऊ : उत्तरप्रदेश संस्कृत संस्थानम्-प्रकाशनम्, १९९६ ।

२. मिश्र, जगदीशचन्द्र । *वैदिकवाङ्मयस्येतिहासः।* वाराणसी : चौखम्बा सुरभारती प्रकाशनम् , २०२१ ।

३. अनिर्वाण । *वैदिसाहित्य* । कोलकाता : संस्कृत वुक डिपो प्रकाशनम् , २००६ ।

४. मिश्र, युगल किशोर । *वाजसनेय-प्रातिशाख्य एक परिशीलन* । वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय प्रकाशनम्, १९९७ ।

५. उपाध्यायः, श्री बलदेव । *वेदभाष्यभूमिकासंग्रहः* । वाराणसी : चौखम्बा संस्कृत संस्थान प्रकाशनम् , १९८५ ।

६. वरदाचार्य, भि.,। *संस्कृत साहित्य का इतिहास।* रामनारायणलाल वेणीप्रसाद प्रकाशकः, १९६२ ।

**(Secondary Sources)**

७. वन्द्योपाध्यायः, शान्तिः। *वैदिकसाहित्येररूपरेखा।*कोलकाता : संस्कृतपुस्तकभाण्डारप्रकाशनम्, १९९३ (प्रथमःप्रकाशः), (द्वितीयःप्रकाशः) २००२, २००३ (तृतीयसंस्करणम्)।

८. वसु, योगीराजः। *वेदेरपरिचय* । कोलकाता : फार्माके. एल. एम.प्राइभेटलिमिटेडप्रकाशनम्, २०१५ (एकादशमुद्रण)।

**अन्तर्जालसूची**

७. www.googlebooks.com

८. www.sanskritilibrary.com

९. www.shodhganga.com

१०.www.archive.com

११. www.epustkalaya.in